अष्टन्-स्वरविचारः

सि यस् यस् नरसिंहमूर्ति

पाणिनीयेऽष्टके अष्टन आ विभक्तौ इति सूत्रे हलीत्यपकर्षस्य किं प्रयजोनमिति विचारपरोऽयं लेखः। अत्र लेखकः अष्टानामिति रूपसिद्धिं प्रयोजनत्वेन उपपाद्य कैयट-हरदत्तादीनां मतविमर्शनपूर्वकं प्रियाष्टानामित्यत्र न ह्यन्यदतश्चतसृशब्दादिति भगवद्वचनप्रमाणं दर्शयन् अष्टन्स्वरस्य चारितार्थ्यं निराकरोति।

अष्टन आ विभक्तौ (७-२-८४) इति सूत्रमष्टाध्यायां सप्तमाध्याये विद्यते। एतदनन्तरसूत्रमस्ति - रायो हलि इति। उभेऽपि सूत्रेऽऽत्त्वविधायके। ष्णान्ता षट् इति सूत्रे भगवता भाष्यकारेण 'हलीत्युभयो शेषः' इति कथनात् हलीति अत्रापकृष्यते। तच्च हलीतिपदं विभक्तौ इत्यस्य विशेषणम्। तेन यस्मिन् विधिस्तदादावल्ग्रहणे' इति परिभाषया तदादिविधिः। एवञ्च अष्टनः आत्वं भवति हलादौ विभक्तौ इति सूत्रार्थः लभ्यते। अष्टाभिः इत्युदाहरणम्। अष्टन् शब्दः नित्यबहुवचनान्तः। ततः तृतीयाबहुवचने भिस् प्रत्यये, अनेन सूत्रेण हलादिविभक्तिपरकत्वेन नकारस्य आत्वे, सवर्णदीर्घ, रुत्वे, विसर्गे, अष्टाभिः इति रूपं सिद्ध्यति। एवमेव अष्टाभ्यः इति रूपमपि भवति। षष्ठीबहुवचने अष्टन् + आम् इति स्थिते हलीत्यपकर्षस्याङ्गीकारात् आदौ षट्चतुर्भ्यश्च इति षट्संज्ञां निमित्तीकृत्य आमः नुडागमः प्रवर्तते। अष्टन् + नाम् इति स्थिते सम्प्रति हलादिविभक्तिपरकत्वेन आत्वे, सवर्णदीर्घे अष्टानाम् इति रूपं सिद्ध्यति।

अत्रेयं शङ्का - अष्टन् + नाम् इत्यावस्थायाम् अष्टन आ विभक्तौ इत्यनेन आत्वं न भवति। नुमागमः नान्तसंख्यावाचकषट्संज्ञां निमित्तीकृत्य प्रावर्तत। आत्वे नान्तत्वं नङ्क्ष्यति। अतः सन्निपातपरिभाषया नान्तसंख्यावाचकत्वं निमित्तीकृत्य प्रवृत्तः नुडागमः तद्विघातक आत्वं प्रति निमित्तं न भवति इति आत्वाप्रवृत्तौ अष्टानाम् इति रूपं न सिद्ध्यति।

अत्रेदमुत्तरम्- शमामष्टानां दीर्घः श्यनि इति निर्देशात् एतद्विषये सन्निपातपरिभाषा न प्रवर्तते इत्युभ्युपगमात् आत्वं प्रवर्तते। एवम् अष्टानाम् इति रूपसिद्धिः हलीत्यपकर्षस्य प्रयोजनम्।

सन्निपातपरिभाषायाः अनित्यत्वेन अष्टानाम् इति रूपसाधनं किमर्थम्? प्रकारन्तरेण तच्च रूपं साधयामः- अष्टन् + आम् इति स्थिते षट्चतुर्भ्यश्च इति नुडागनो भवति। तदा 'नोपधायाः (नान्तय उपधायाः दीर्घः स्यान्नामि परे) इत्यनेन उपधादीर्घे, हलादिप्रत्ययपरकत्वेन पदसंज्ञायां 'न लोपः प्रातिपदिकान्तस्य' इति नलोपे अष्टानाम् इति भवति। अत्रापि नान्तसंख्यावाचकत्वं निमित्तीकृत्य जायमानः नुडागमः तद्विघातकनलोपं प्रति निमित्तं न भवति इति सन्निपातपरिभाषाविरोधान नलोपः न प्राप्नोति खलु-

उच्यते - सन्निपातपरिभाषा कृन्मेजन्तः इति सूत्रे भाष्ये पठिता। अतः सपादसप्ताध्यायीस्थत्वं परिभाषायाः, न लोपः प्रातादिकान्तस्य (८-२-७) इति सूत्रं त्रिपाद्यां वर्तते। पूर्वत्रसिद्धम् इति सूत्रेण सपादसप्ताध्यायीं प्रति त्रिपाद्याः असिद्धत्वबोधनात् परिभाषादृष्ट्या (नलोपस्य असिद्धत्वेन) नकारस्य विद्यमानत्वेन सन्निपातविघातः तत्र नास्ति इति वक्तुं शक्यते। अथवा षट्चतुर्भ्यश्च (७-१-५५) इति नुडागमदृष्ट्या नलोपस्यासिद्धत्वेन न सन्निपातविघात इति वक्तुं शक्यते च।

पूर्वोक्तरीत्या नलोपस्यासिद्धत्वेन सन्निपातविघातो नेति वक्तुं न शक्यते। तथा सति कृन्मेजन्तः इति सूत्रभाष्यविरोधः। तत्रहि - हे गौरि इत्यत्र हे गौरी + सु इति स्थिते गौरीत्यस्य नदीसंज्ञायाम् अम्बार्थनद्योर्ह्रस्वः (अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ) इत्यनेन सम्बुद्धिं निमित्तीकृत्य ह्रस्वे, एङ् ह्रस्वात् सम्बुद्धेः इत्यनेन सुलोपे हे गौरि इति रूपं भवति। तत्र भाष्यकारः सम्बुद्धिं निमित्तीकृत्य जायमानः ह्रस्वः तद्विघातकसुलोपं प्रति निमित्तं न भवेत् इत्याशङ्क्य 'नदीह्रस्वत्वं सम्बुद्धिलोपस्य' इति नात्र सन्निपातपरिभाषा प्रवर्तते इत्युक्तम्।

भवदुक्तरीत्या तत्रापि प्रत्ययलक्षणेन सम्बुद्धिः भवतीति चिन्तयति चेद्भाष्यकारः तत्रातिव्याप्तिं किमर्थं प्रत्यपीपदत्?

किञ्च पूर्वत्र कर्तव्ये परस्यासिद्धत्वं पूर्वत्रासिद्धम् इत्यनेन बोध्यते, परे कृते तस्य पूर्वदृष्ट्या असिद्धत्वं न कदापि बोध्यते। अतः प्रकारान्तरेण रूपं न सिद्ध्यति।

अन्यथा (हलीत्यपकर्षाभावे) अष्टन् + आम् इति स्थिते नुट्-आत्वयोः प्राप्तौ षट्चतुर्भ्यश्च (७-१-५५) अष्टन आ विभक्तौ (७-२-८४) इति, उभयोः

मध्ये परत्वात् आत्वं प्राप्नोति, एवं नित्यत्वादपि प्राप्नुयात्। यतो हि नुडागमे कृतेऽकृतेऽपि आत्वस्य प्राप्तिः विद्यते। अतः आत्वे नान्तत्वाभावात् षट्संज्ञायाः अभावात् नुडागमो न स्यात्। तथा च अष्टानाम् इति रूपं न सिद्ध्यति। अतः हलीत्यपकर्षः आवश्यकः।

अष्टन् शब्दस्य नान्तसंख्यावाचकत्वेन षट्संज्ञा ष्णान्ता षट् इति सूत्रेण विधीयते। तच्च संज्ञाविधायकं सूत्रम्। संज्ञापरिभाषाणां विध्युपकारविषये पक्षद्वयं विद्यते - यथोद्देशपक्षः, कार्यकालपक्षश्च। तत्र यथोद्देशपक्षे भविष्यति किञ्चिदनेन प्रयोजनम् इति निर्णीय आदावेव अष्टन् शब्दस्य नान्तसंख्यावाचकत्वं निमित्तीकृत्य (विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वात्) षट्संज्ञां कुर्मः, अनन्तरम् आमि आत्वे, पूर्वां कृतां संज्ञा कृतात्वेऽपि एकदेशविकृतमनन्यवत् इति परिभाषया आनीयते। तेन षट्चतुर्भ्यश्च इति नुडागमो भवति, अष्टानाम् इति रूपं सिद्ध्यति हलीत्यस्यापकर्षाभावेऽपि। अतः हलीत्यपकर्षस्य यथोद्देशपक्षे प्रयोजनं नास्त्येव।

कार्यकालपक्षे षट्संज्ञायाः विधिसूत्रैकवाक्यतया नुडेकवाक्यतापन्नत्वेन, परनिमित्तकत्वेन बहिरङ्गत्वम् आत्वस्य विभक्तिनिमित्तकत्वेन समानम्। हलीत्यस्यापकर्षाभावे नुटि कृते, अकृतेऽपि आत्वस्य प्राप्त्या आत्वं नित्यं भवति। नित्यत्वात् आत्वे नान्तसंख्यावाचकत्वाभावान्नुडागमो न स्यात्। तथा च अष्टानाम् इति रूपं न सिद्ध्यति। तत्सिद्ध्यर्थं हलीत्यपकर्षः भाष्यकारेण स्वीकृतः।

शब्दरत्नकारः एवमवोचत - षट् संज्ञायाः अल्विधित्वेन तन्मूलककार्याणामप्यल्विधित्वमित्यभिमानः। यदि नान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य स्थान्यल्धर्मत्वाभावेन तत्प्रयुक्तकार्यस्य नुडादेरपि नाल्विधित्वमिति स्थानिवत्त्वेन एकदेशविकृतन्यायेन च नुट् सुलभः तर्हि मुख्ये कार्यकालपक्षे तत्सिद्धिः हलीत्यनुवृत्तेः फलमिति बोध्यम्।

एवं रीत्या अष्टन आ विभक्तौ इति सूत्रे हलीत्यपकर्षस्य 'अष्टानाम्' इति रूपसिद्धिः प्रयोजनमिति प्रतिपादितम्। तथा च आत्वम् अष्टाभिः अष्टाभ्यः, अष्टानाम्, अष्टासु इत्यत्र हलादिविभक्तिषु भवति। जसि, शसि अजादित्वात् न भवति इति निश्चीयते।

एवं स्थिते अष्टाभ्य औश् इति सूत्रेण अष्टाभ्य परयोः जश्शसोः औश् विधीयते। सूत्रार्थः एवं वर्ण्यते कृताकारादष्टनः परयोः जश्शसोः औश् भवतीति। तत्कथं सङ्गच्छते। हलादिविभक्तिपरकत्वाभावात्। इति चेद्–

उच्यते- अष्टाभ्यः इति कृतात्वस्य अनुकरणम्- इति शेखरकारः उवाच। लक्षणवशसम्पन्नत्वे हि तस्य वैकल्पिकतया मात्रालाघवादष्टभ्य इति वदेदिति तस्याशयः। वैकल्पिकेषु भावानुष्ठानं धर्माधिक्यफलायेति तु लौकिकप्रयोविषयो नतु सौत्रप्रयोगविषय इति तदाशयः इति गुरुप्रसादशेषे व्याख्यातारः लिलिखुः।

अष्टन आ विभक्तौ इति सूत्रे हलीत्यपकृष्य वाक्यद्वयं क्रियते - अष्टनः इत्येकम्, आ विभक्तौ इत्यपरम्। द्वितीयवाक्ये हलीत्यस्य सम्बन्धः, तेन प्रथमवाक्यं क्वचिदक्ष्वपि प्रवर्तते। इति शेक्षरकाराशयः।

शेखरकारः अष्टाभ्य औश् इति सूत्रे शब्देन्दुशेखरे एवं प्रास्तावीत् - अष्टाभ्य उङ् इति कुतः नोक्तम् इति। तेषामयमाशयः भवितुमर्हति यत् - तदा सूत्रार्थः एवं भवति 'कृताकारादष्टनः परयोः जश्शसोः उङ् भवति इति। उङः ङित्वात् ङिच्च इत्यनेन अन्तादेशो भवति। जसः सकारस्य उङ् भवेत्। अष्टा अ उ इति स्थिते प्रत्ययावयवयोः द्वयोः आकार उकारयोः गुणे, वृद्धौ अष्टौ इति रूपं भवति खलु इति चेद्-

अष्टौ इति रूपं न सिद्ध्यति - अष्टा अ उ इति स्थिते गुणो न भवति। 'इण्ङशीनामाद्गुणः सवर्णदीर्घत्वात् "शचङन्तस्यान्तरङ्गलक्षणत्वात्" इति वचनाभ्याम् अन्तरङ्गत्वात् सवर्णदीर्घ एव भवति। एवञ्च आदौ सवर्णदीर्घः प्रवर्तते। तदनन्तरं गुणे अष्टौ इति रूपं न सिद्ध्यति। अतः अष्टाभ्य औश् इति सूत्रं भगवान् पाणिनिः अकार्षीत्।

वारणसेयाः एव व्याचख्युः - प्रथमाबहुवचने अष्टौ इति रूपं सिद्ध्यति। अष्टा अ उ इति स्थिते सवर्णदीर्घः - गुणः इति द्वे कार्ये प्राप्नुतः। प्रकृतिप्रत्यययसम्बन्धिवर्णापेक्षदीर्घापेक्षया प्रत्ययमात्रसम्बन्धिवर्णापेक्षत्वेन गुणस्यापि अन्तरङ्गत्वात् उभयोः अन्तरङ्गयोः, कृताऽकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वं गुणे अष्टौ इति रूपं प्रथमाबहुवचने भवति। द्वितीयाबहुवचने शसि गुणे कृते अष्टा ओ इति स्थिते असर्वनामस्थानाजादिविभक्तिपरकत्वेन भसंज्ञायाम् आतो धातोः इति आकारलोपापत्तिः। अत्राकारान्तधातुर्नास्ति खलु इति चेत् - तत्र आतः, धातोः इति योगविभागं कृत्वा धातुग्रहणम् आबन्तनिवृत्यर्थमिति सिद्धान्तितत्वात्। अतो द्वितीयाबहुवचने एव दोषः इति।

नागेशाशयं समर्थयन् गुरुप्रसादशेषे वेङ्कटेश्वरशास्त्रिणः एवं खण्डयामासुः। प्रकृतिप्रत्ययसम्बन्धिकार्यं बहिरङ्गम्, प्रत्ययसम्बन्धिकार्यमन्तरङ्गम् इत्येतादृश

अन्तरङ्गविचारः क्वापि अदर्शनेन मूलोक्तरीतिरेव साध्वी। इति।

वैकल्पिकं चेदमष्टन आत्वम् अष्टनो दीर्घात् इति सूत्रे दीर्घग्रहणात् ज्ञापकात् इति सिद्धान्तकौमुद्यां भट्टोजीदक्षितः अगादीत्। तथाहि – अष्टनो दीर्घात् (६-१-१७२) इति सूत्रस्यैवमर्थो विद्यते – दीर्घान्तादष्टनः परा असर्वनामस्थानविभक्तिः उदात्ता भवति। (अष्टाभिः दशभिः) इत्युदाहरणम्। यदि आत्वं नित्यं तदा सर्वदा अष्टन् शब्दः दीर्घान्त एव भवति। अत ह्रस्वेऽन्तोदात्तव्यावृत्त्यर्थ क्रियमाणं दीर्घग्रहणं व्यर्थं सत् एवं ज्ञापयति – इदम् = श्रुतम् हलादौ, अनुमितम् = जश्शसोः विषये अष्टनः आत्वं वैकल्पिकमिति। तेन ह्रस्वे अष्टभिः इत्यत्र झल्युपोत्तमम् (६-१-१८०) इति (षट्त्रिचतुभ्यो या झलादिविभक्तिः तदन्ते पदे उपोत्तमम् उदात्तं भवति इत्यर्थः अध्वर्युभिः पञ्चभिः इत्युदाहरणम्) उपोत्तमोदात्तत्वं भवति।

अत्र शब्दरत्नकारः एवमभिप्रैति – ज्ञापनोत्तरं दीर्घग्रहणस्य स्वांशे चरितार्थ्यं न सम्भवति इति। तथाहि – अष्टन् भिस् इत्यवस्थायामात्वे अष्टाभिः इत्यत्र अष्टनो दीर्घात् इति अष्टन्स्वरः चरितार्थः। कार्यकालपक्षे सम्प्रति षट्संज्ञा न प्रवर्तते, नान्तत्वाभावात्। अष्टन् स्वरार्थं षट्संज्ञायाः अपेक्षा नास्ति। अतः निस्संशयम् अष्टन्स्वरः प्रावर्तत। स च स्वरः अष्टभिः इत्यत्रापि प्राप्नोति। (झल्युपोत्तमम् इति स्वरः पञ्चभिः इत्यत्र चरितार्थः) तत्रैव झल्युपोत्तमम् (६-१-१८०) इति सूत्रेण उपोत्तमोदात्तत्वञ्च प्राप्नोति। तदाष्टन् स्वरापेक्षया परत्वात् झल्युपोत्तमम् इति स्वर एव प्रवर्तते। तदनन्तरं पुनः अष्टन् स्वरः न प्रवर्तत एव – सकृदगतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव इति न्यायात्- (अन्यत्र चरितार्थयोः द्वयोः शास्त्रयोः एकस्मिन् लक्ष्ये युगपत्प्रवृत्तौ सकृदेकवारं यद्बाधितं तद्बाधितमेव इति परिभाषार्थः।) एवञ्च तत्र अष्टन् स्वरस्य प्राप्तेरेवाभावेन तद्धारणार्थं कृतेन दीर्घग्रहणेन किम्?

सिद्धान्ती एवं कथयति – अष्टभिः इत्यत्र अष्टन्स्वरापेक्षया परत्वात् झल्युपोत्तमम् इति स्वर एव प्रवर्तते सकृद्गतिन्यायात् इति। यावता विनाऽनुपपत्तिः तस्य सर्वस्य ज्ञाप्यत्वम् इति न्यायेन दीर्घग्रहणस्य आत्ववैकल्पिकत्वप्रतिपादकपरभाष्यप्रामाण्येन सकृद्गतिन्यायस्यानित्यत्वज्ञापनद्वारा पुनः प्रसङ्गन्यायस्य प्रवृत्तिः ज्ञाप्यते। तेन पुनः अष्टन् स्वरः ह्रस्वे प्राप्तौ तद्व्यावृत्त्यर्थ दीर्घग्रहणं स्वांशे चरितार्थम्। एवञ्च कार्यकालपक्षे दीर्घग्रहणम् आत्वस्य वैकल्पिकत्वं, सकृद्गतिन्यायस्य वैकल्पिकत्वञ्च ज्ञापयति।

यदि त्विह यथोद्देशपक्ष एव स्वीक्रियेत, तदा हलीत्यस्याऽऽत्वविधायकसूत्रेऽपकर्षो न कार्यः। अतः लाघवात् यथोद्देशपक्ष एवात्र स्वीक्रियते। तदा

अष्टन् इत्यवस्थायां नान्तसंख्यावाचकत्वात् षट् संज्ञा प्रावर्तत। ततः भिसि, आत्वं प्रवर्तते। एवञ्च अष्टाभिः इत्यत्रापि षट्त्रिचतुर्भ्यो हलादिः (६-१-१७९) एभ्यो हलादिः विभक्तिः उदात्ता भवतीति सूत्रस्य प्राप्त्या अष्टनो दीर्घात् इति सूत्रस्य अचारितार्थ्येनाऽपवादत्वेन अष्टाभिः इत्यत्रेव अष्टभिः इत्यत्रापि स्यादिति दीर्घग्रहणमिति। नान्ते कृतषट्संज्ञायाः स्थानिवद्भावेन आत्वानन्तरमपि आनीयते। नात्र अनल्विधाविति निषेधः - नान्तसंख्यावाचकत्वसमानाधिकरणधर्मरूपस्य षट्संज्ञानिमित्तिकस्वरस्याल्धर्मत्वाभावेन। स्वरादीनाम् इत्यत्र आदिपदेन षट्चतुर्भ्यश्च इति नुडागमश्च गृह्यते। अतः सोऽपि नाल्विधिः। एवञ्च अत्रापि षट्त्रिचतुर्भो हलादिः इत्यस्य प्राप्त्या अष्टन् स्वरस्य तदपवादत्वात्।

दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारन्तस्येति भाष्यस्यायमेवाशयः इति न विरोधः। एवञ्च अष्टाभिः इत्यत्रेव अष्टभिः इत्यत्रापि तत्प्रवृत्तिः स्यादिति तद्व्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं विकल्पज्ञापकमिति भावः।

एवं यथोद्देशपक्षे अष्टन् शब्दस्य षट्संज्ञा अन्तरङ्गत्वात् प्रावर्तत इति निश्चिते पक्षे सम्प्रति दोषः। अष्टन् शब्दस्य द्वितीयाबहुवचने शसि, तस्य अष्टाभ्य औश् इत्यनेन औ आदेशे, आत्वानन्तरम् आकारान्तस्यापि षट्संज्ञायां तस्य षड्भ्यो लुक् इत्यनेन लुकि अष्टौ इति रूपं न सिद्ध्यति। इति चेत्-

सत्यम्। आकारान्तस्य षट्त्वेऽपि अष्टाभ्य औश् इत्यनेन औश्विधिसामर्थ्याल्लुक् न भवति।

पूर्वपक्षी एवं पृच्छति - षट्त्रिचतुर्भ्यो हलादिः, झल्युपोत्तमम् इति द्वयोः सूत्रयोः अपवृत्तिस्थले अष्टौ इति द्वितीयाबहुवचने अष्टनो दीर्घात् इति सूत्रं प्रवर्तते। एवञ्च अष्टौ इत्यत्र अष्टन् स्वरः चरितार्थः। तत्र चरितार्थः अष्टन् स्वरः अष्टभिः इत्यत्र प्राप्नोति, परेण झल्युपोत्तमम् इत्यनेन बाध्यते। अत ह्रस्वे प्राप्तेरेवाभावेन तत्र स्वरव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं किमर्थम्?

अष्टौ इत्यत्र अष्टा + औ इत्यवस्थायाम् वृद्धिः प्राप्नोति, अष्टन् स्वरश्च प्राप्नोति। अन्तरङ्गत्वात् एकादेशः प्रवर्तते। इदानीं षट् संज्ञकात्परत्वेन शसः अभावात् स्वरो न प्रवर्तते। अतः स्वरस्य चारितार्थ्यं नास्ति खलु-

उच्यते - स्वरात् पूर्व सन्धिकार्यं न प्रवर्तते इति 'यद्धितुपरं छन्दसि (८-१-५६) इति सूत्र भाष्ये ध्वनितम् - तत्रहि - लोट् च (८-१-५२) इति सूत्रे

'गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् (८-१-५१) इत्यनुवर्तमाने लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम्, आगच्छ देव ग्रामं पश्य इत्युदाहरणम्। पश्य इति लोडन्तं गत्यर्थलोटा आगच्छ इत्यनेन युक्तं तत् नानुदात्तं प्राप्नोति। अनन्तरं यद्धितुपरम् छन्दसि इति सूत्रेण तिङन्तं नानुदात्तम् इति स्वरनिषेधः विहितः। निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्- कच्चिद्यत्रयुक्तम् (८-१-३०) एतैः युक्तं न निहन्यते। हि च (८-१-३४) हियुक्तं तिङन्तं नानुदात्तम्। तुपश्यपश्यताऽहैः पूजायाम् (८-१-३९) एभिः युक्तं तिङन्तं न निहन्यते पूजायाम्। एतैः सूत्रैः सिद्धे यद्धितुपरम् छन्दसि इति सूत्रं नियमार्थम्। एतैरेव परभूतैः योगे नान्यैः इति। तेन 'जाये स्वो रोहावेहि इत्यत्र (जाये स्वः रोहाव आ + इहि) आङ परत्वम् इहीत्यस्य अस्तीति कृत्वा तिङतिङः इति निघातो भवति।

लोट् च (८-१-५२) इति सूत्रे 'गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् इति निषेधमाशङ्क्य छान्दसत्त्वेन समाहितम्। रोहाव आ इहि इत्यत्र आङ् इत्युपसर्गः रुहधातोः छन्दसि परेऽपि इत्यनेन परे भवति इति कथयामः चेत् - तदा समानवाक्यत्वाभावात् समानवाक्ये निघातयुष्मदस्मदादेशाः इति नियमात् न स्यात्। रुह धातोः गत्यर्थकत्वाभावात्। उपसर्गस्तु नानेन सम्बध्यते। अत एव न रुहिः गत्यर्थः। (अवष्टम्भार्थकः) अत्र प्रमाणम् - गत्यर्थाकर्मकश्लिषशीङ्स्थासव-सजनरुहजीर्यतिभ्यश्च इति सूत्रे गत्यर्थेभ्यः पृथक् रुहिग्रहणं चरितार्थम्। येषामुपसर्गयोगाद्विना गतिप्रतीतिहेतुत्वं ते गत्यर्थाः रुहिस्तु उसर्गयोगे गतिवाची। यदि रुहिः न गत्यर्थः - आराहन्ति हस्तिनं मुनष्याः, आरोहयति हस्ती स्थलं (हस्त्युपरिध्रियमाणं काष्ठादिमयमुपवेशनम्) मनुष्यान् - गतिबुद्धि - इत्यादिना कर्मसंज्ञा न प्राप्नोति। तस्मान्नैतच्छक्यं वक्तुं 'न रुहिः गत्यर्थः' इति। कस्मात्तर्हि रोहावेत्यनेन युक्ते एहित्यस्य न भवति? छान्दसत्वात्॥ तत्र कैयटेन एवं व्याख्यातम् - नित्यत्वात् एकादेशे निघाताप्राप्तिमाशङ्क्य एवंविधभाष्यविचारात्पूर्वं सन्धिकार्याप्रवृत्तिरनुमीयते इति। नेन्द्रस्य परस्य इति सामान्यापेक्षं ज्ञापकमिति नागेशः। एवञ्च अष्टौ इत्यत्र सन्धिकार्यात् पूर्वं स्वर एव प्रवर्तते, अतः अष्टौ इत्यत्र अष्टन् स्वरः चरितार्थः। तत्र चरितार्थः अष्टन् स्वरः अष्टभिः इत्यत्र प्राप्नोति, परेण झल्युपोत्तमम् इत्यनेन बाध्यते। अतः ह्रस्वे प्राप्तेरेवाभावेन तत्र स्वरव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं किमर्थम्?

दीर्घग्रहणस्य आत्ववैकल्पिकत्वज्ञापकतापरभाष्यप्रामाण्यात् अष्टन् शब्दस्य 'घृतादीनाञ्च' इत्यन्तोदात्तत्वेन तेन साकम् एकादेशे 'एकादेश उदात्तेन उदात्तः'

इत्यनेन उदात्तो भवति। अतः एवमन्तोदात्तत्वं सिद्ध्यति। घृतादिषु पाठाभावे 'न्रः संख्यायाः' इत्यनेनाद्युदात्तत्वं स्यात्। किञ्च एकादेशे कृतेऽपि एकदेशविकृतमनन्यवत् इति न्यायेन टान्तेऽष्टन् शब्दत्वं परादिवद्भावेन औ इत्यस्य विभक्तित्वं सिद्ध्यति। एवम् अष्टनो दीर्घात् इति सूत्रं विनापि अन्तोदात्तस्वरः सिद्ध्यति। अतः अष्टन् स्वरः न चरितार्थः।

तर्हि प्रियाष्टाभ्याम् इति समासे अष्टन् स्वरः चरितार्थः। षट् संज्ञकात्परात्वमाश्रित्य- प्राप्तस्वरविधायकसूत्रद्वये विहितविशेषणाश्रयणेन गौणे समासे षट्स्वराप्राप्तेः। षट् स्वराप्राप्तिस्थले अष्टन् स्वरः चरितार्थः। अष्टभ्याम् इत्यत्र उभौ स्वरौ प्रप्नुतः। परत्वात् षट् स्वर एव प्रवर्तते। अतः तत्र स्वरव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं व्यर्थमेव।

एतादृशार्थस्वीकारादेव 'चतुरः शसि' ('-१-१६७) (चतुरोऽन्त उदात्तः शसि परे इत्यर्थः।) इति सूत्रभाष्यं सङ्गच्छते। तत्र हि - चतुरः शसि इत्यनेन विहितः स्वरः 'शसि स्त्रियां प्रतिषेधः' चतस्रः पश्य इति वार्तिककारः उवाच।

अन्यथा - चतुर् शब्दः एवं निष्पन्नो भवति - चतेरुरन् इति उणादिसूत्रेण चते - याचने इति धातोः उणादि उरन् प्रत्ययः। प्रत्ययस्य नित्वेन 'न्रः संख्यायाः' इति आद्युदात्तत्वं भवति। तस्य स्त्रियां त्रिचतुरोः स्त्रियां तिसृचतसृ इत्यनेन चतस्रादेशे स्थानिवद्भावेन अन्तोदात्तत्वे सिद्धे, तिसृ + अस् इति स्थिते अचि र ऋतः इत्यनेन रेफादेशे उदात्तयणो हल्पूर्वात् (६-१-१७४) इत्यनेन (उदात्तस्थाने यो यण् हल्पूर्वः तस्मात् परा नदी शसादिविभक्तिश्च उदात्ता स्यात्) उदात्तत्वं तकाराकारस्य सिद्ध्यति। अतः पुनर्विधानं किमर्थमित्याशयेन 'चतुरः शसि स्त्रियामप्रतिषेधः आद्युदात्तनिपातनात्' (चतसर्याद्युदात्तनिपातनात्सिद्धम्) इति वार्तिककारः अवोचत्। स्थानिवद्भावादाद्युदात्तत्वे सिद्धे पुनराद्युदात्तनिपातनमस्य स्वरस्य बाधकमित्यर्थः। **विभक्तिस्वरः चतुरः शसि इति सूत्रविहितः। निपातस्वरः - चतुरः शसि स्त्रियामप्रतिषेधः आद्युदात्तनिपातनात् इति वार्तिकविहितः।**

षट्त्रिचतुर्भ्यो हलादिः, झल्युपोत्तमम् इत्यत्र विहितविशेषणत्वस्वीकारे न ह्यन्यद्धलादिग्रहणे प्रयोजनम् इति भाष्यमेव प्रमाणम्। - अयम्भावः - षट्त्रिचतुराः नित्यबहुवचनान्ताः। अतः द्विवचनैकवचने न भवतः। तत्र षड्भ्यः परयोः जश्शसोः लुगेव। अन्या सर्वा हलादयः। 'अञ्चेश्छन्दस्यसर्वनामस्थानम् (६-१-१७०) (अञ्चेः परा विभक्तिरुदात्ता भवति) इति सूत्रात् असर्वनामथाने इत्यनुवृत्त्या त्रिचतुरोः जसि

नेदम्। त्रीन् इति शसि एकादेश उदात्तेनोदात्तः इत्येव सिद्धम्। तिस्रः पश्य इत्यत्र तु उदात्तयणो हल्पूर्वात् (६-१-१७४) इयनेन (उदात्तस्थाने यो यण् हल्पूर्वः तस्मात् परा नदी शसादिविभक्तिश्च उदात्ता स्यात्) सिद्धम्। अन्या सर्वा हलादयः। चतुरः पश्य इत्यत्रापि नानेन स्वरः- चतुरः शसि इत्यारम्भात्। तस्मात् चतस्रः पश्येत्येव तद्व्यावर्त्यम्। यदि निपातनस्वरो विभक्तिस्वरबाधकः स्यात् तदा तद्धैयर्थ्यं स्पष्टमेव। तस्मात् निपातनस्वरः विभक्तिस्वरस्य बाधको न भवति इति ज्ञाप्यते। तेन चतसृणामित्यादौ विभक्तिस्वरः सिद्ध्यति। अतः चतसृणामित्यत्र विभक्तिस्वरः सिद्धः। षट् त्रिचतुर्भ्यो हलादिः इति सूत्रे हलादिग्रहणेन निपातनस्वरस्य विभक्तिस्वराबाधकत्वज्ञापनात्। आद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यम्, 'न ह्यन्यद्धलादिग्रहणं प्रयोजयति, अन्यदतश्चतसृशब्दात्' इति भाष्योक्तं सङ्गच्छते।

चतुरः शसि (६-१-१६७) इति सूत्रभाष्यम् - **शसि स्त्रियां प्रतिषेधः।** शसि स्त्रियां प्रतिषेधो वक्तव्यः। चतस्रःपश्य। **चतुरः शसि स्त्रियामप्रतिषेध आद्युदात्तनिपातनात्॥** चतुरः शसि स्त्रियामप्रतिषेधः अनर्थकः प्रतिषेधोऽप्रतिषेधः। शसि स्वरः कस्मान्न भवति? आद्युदात्तनिपातनात्। आद्युदात्तनिपातनं करिष्यते, स च निपातनस्वरः शसि स्वरस्य बाधको भविष्यति॥ एवमप्युपदेशिवद्भावो वक्तव्यः। यथैव हि निपातनस्वरः शसिस्वरं बाधते एवं विभक्तिस्वरमपि बाधेत। चतसृणामिति। **विभक्तिस्वरभावश्च हलादिग्रहणात्** विभक्तिस्वरस्य च भावः सिद्ध। कुतः? हलादिग्रहणात्। यदयं षट्त्रिचतुर्भ्यो हलादिः इति हलादिग्रहणं करोति तज्ज्ञापयत्याचार्यो 'न निपातनस्वरो विभक्तिस्वरं बाधते' इति। कथं कृत्वा ज्ञापकम्? **आद्युदात्तनिपातने हि सति हलादिग्रहणानर्थक्यम्॥** आद्युदात्तनिपातने हि सति हलादिग्रहणमनर्थकं स्यात्। नह्यन्यद्धलादिग्रहणं प्रयोजयत्यन्यदतश्चतसृशब्दात्। षट् संज्ञास्तावन्न प्रयोजयन्ति। किं कारणम्? **बहुवचनविषयत्वात्।** तेन द्विवचनैकवचने न स्तः। जश्शसी चात्र लुप्येते। अन्याः सर्वाः हलादयो विभक्तयः। त्रिशब्दश्चापि न प्रयोजयति। किं कारणम्? बहुवचनविषयत्वात्। तेन द्विवचनैकवचने न स्तः। असर्वनामस्थानमिति वचनाण् जसि न भविष्यति। शसि भवितव्यमेकादेश उदात्तेनोदात्त इति। अन्याः सर्वाः हलादयो विभक्तयः। तिसृशब्दश्चापि न प्रयोजयति। किं कारणम्? बहुवचनविषयत्वात्। तेन द्विवचनैकवचने न स्तः। असर्वनामस्थानमिति वचनात् जसि न भवितव्यम्। शसि भवितव्यम् उदात्तयणो हल्पूर्वादिति। अन्याः सर्वाः हलादयो विभक्तयः। चतुः शब्दश्चापि न प्रयोजयति। किं कारणम्? बहुवचनविषयत्वात्। तेन द्विवचनैकवचने न स्तः। असर्वनामस्थानमिति वचनात् जसि न भवितव्यम्।

शसि भवितव्यम्' चतुरः शसीति। अन्याः सर्वाः हलादयो विभक्तयः। तत्र चतसृशब्दादेकस्माच्छस् असर्वनामस्थानमजादिर्विभक्तिरस्ति। यदि चाऽत्र निपातनस्वरः स्याद्धलादिग्रहणमनर्थकं स्यात्। नैव वा पुनरत्र शसिस्वरः प्राप्नोति॥ किं कारणम्? यणादेशे कृते शसः पूवम् उदात्तभावी नास्तीति कृत्वा। अवशिष्टस्य तर्हि प्राप्नोति। ऋकारेण व्यवहितत्वान्न भविष्यति। यणादेशे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिध्यतेऽत्र स्थानिवद्भावः 'स्वरविधिं प्रति न स्थानिवद्भवतीति। नैषोऽस्ति प्रतिषेधः। उक्तमेतत् - प्रतिषेधो स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति।

यदि षट् स्वरविधायके सूत्रे न विहितविशेषणं तदा अन्यदतश्चतसृशब्दात् इति कथनमसङ्गतं स्यात्। प्रियाष्टानः इति बहुव्रीही सम्भवात्।

प्रियाः अष्टौ यस्य सः इति बहुव्रीहिसमासे प्रियाष्टाः- प्रियाष्टा इति वा भवति। तस्य षष्ठी बहुवचने प्रयोजनसत्त्वात् नान्यदतः चतसृशब्दात् इति कथनमसङ्गतं स्यात्। अष्टौ परमाष्टौ इत्याद्यपि न व्यावर्त्यम्। तत्र एकादेश उदात्तेनोदात्त इति स्वरेणैव सिद्ध्यति।

वस्तुतस्तु ष्णान्ता षट् इति सूत्रे भाष्ये अष्टन आ विभक्तौ इत्यत्र हलीत्यपकर्षमुक्त्वा प्रियाष्टौ - प्रियाष्टाः इति न सिद्ध्यति, प्रियाष्टानौ - प्रियाष्टानः इत्येव प्राप्नोति इति शङ्किते यथा लक्षणमप्रयुक्ते इति समाहितम्। नैव वा लक्षणमप्रयुक्ते प्रवर्तते, प्रयुक्तानामेवान्वाख्यानात् इति कैयटः।

कदष्टौ इति व्यावर्त्यं स्यात्। तथाहि - कुत्सिताः अष्टौ इति विग्रहे कुशब्दस्य अष्टन् शब्देन कुगतिप्रादयः इति समासे 'कोः कत्तत्पुरुषेऽचि' इति कोः कदादेशे सिद्धम्। तत्र समासान्तोदात्ते ततो वृद्ध्या एकादेशे औकारे तस्य एकादेश उदात्तेनोदात्तः इत्यन्तोदात्तत्वस्वरः सिद्ध्यति। तत्र स्वरसाधनार्थमपि अष्टन् स्वरः आवश्यकः।

अत्रोच्यते - कुशब्दस्य निपातत्वेन 'निपाता आद्युदात्ता' इति आद्युदात्ततया "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" इति पूर्वपदप्रकृतिस्वरेण अष्टावित्यस्याद्युदात्तत्वात्। अत्र अव्यये नञ् कुनिपातानाम् इति परिगणनेन पूर्वपदप्रकृतिवरव्यावृत्तिस्तु न कर्तुं शक्यते स्थानिवत्त्वेन कत् इत्यस्य कुशब्दत्वाक्षतेः। आद्युदात्तत्वे प्राप्ते अन्तोदात्तत्वार्थम् अष्टन् स्वरः चरितार्थः।

चतुरः शसि इति सूत्रभाष्य (न ह्यन्यद्धलादिग्रहणम्) प्रामाण्यात् कदष्टौ इत्यादीनामनभिधानमेव।

वस्तुतः दीर्घग्रहणस्य आत्ववैकल्पिकत्वप्रतिपादकपरभाष्यप्रामाण्यात् प्रियाष्टादीनामनभिधानमेव। तिसृभ्यो जसः इति सूत्रे भाष्येऽपि जस् ग्रहणं किमर्थम्? इति आशङ्क्य तिसृकेति कन्प्रत्ययान्तं प्रत्युदाहरणमुक्त्वा जस्ग्रहणानर्थक्यमन्यत्राभावात् इत्युक्तम्। अस्यापि नित्यबहुवचनान्ततया तदन्ययोरभाव एव, शसि तु उदात्तयणः इत्येव सिद्धम्। अन्याः सर्वाः हलादयः तत्र षट्त्रिचतुर्भ्यो हलादिः इत्येव भविष्यति। तिसृकेत्यपि न प्रयोजनम्। मध्येऽपवादन्यायेन तिसृभ्यः इत्यस्य अनुदात्तौ सुप्पितौ इति स्वरं बाधिष्यते नित्स्वरं न बधिष्यते। 'उपसमस्तार्थमेके' इति कथनात् तदन्तेऽपि तिसृभ्यो जसः इति स्वरः प्रवर्तत इति लभ्यते। अतः षट्स्वरः अष्टन् स्वरश्च तदन्तेऽपि प्रवर्तन्ते।

चतुरः शसि इति सूत्रस्थं स्त्रियां प्रतिषेधो वाच्यः इति वार्तिकमपि न कार्यम्। चतस्रः पश्य इत्यत्र स्वररेफादेशयोः प्राप्तौ परत्वात् रेफादेशे तस्य स्थाननिवत्त्वेन व्यवधानात् तकाराकारस्य स्वराप्राप्तेः। न च रेफस्यैव स्वरो भवत्विति वाच्यम्? हल्स्वरप्राप्तौ व्यञ्जनस्याऽविद्यमानवद्भावात्। न च स्थानिवद्भावस्य स्वरे कर्तव्ये निषेधो भविष्यतीति वाच्यम्। स्वरदीर्घयलोपेषु लोपाजादशस्यैव स्थानिवद्भावनिषेधात्। एवमाद्युदात्तयोः त्रिचतुरोः आन्तरतम्यादाद्युदात्ते सिद्धे आद्युदात्तनिपातनमपि न कार्यम्। हलीत्यस्यापकर्षस्तु प्रतिपत्तिलाघवाय इति।

तर्हि चतुरः शसीति सूत्रभाष्यविरोधः। तत्र हि विभक्तिस्वरभावश्च हलादिग्रहणात् इति। तच्च वार्तिकं तिसृभ्यो जसः इति सूत्रस्थ जस्ग्रहणानर्थक्यमन्यत्राभावात् इति वार्तिकवद्दूष्यम्।

तिसृभ्यो जसः इति सूत्रस्थ उपसमस्तार्थमेके इति भाष्ये एके इति मुख्यार्थकम्। अतो विहितविशेषणं नास्त्येव क्वापि। तस्मात् गौणे षटत्रिचतुर्भ्यो हलादेः, चतुरः शसि इत्यादयश्च प्रवर्तन्त एव। एवञ्च सत्यभिधाने प्रियत्रीन् इत्यादिव्यावृत्त्यर्थं हलादिग्रहणं सार्थकम्।

प्रियाष्टादीनामनभिधानादेव अष्टाभ्य औश् इति सूत्रे भाष्ये विभाषा आत्वं यदयमात्वभूतस्य ग्रहणं करोति अष्टाभ्य इति, अन्यथाऽष्टन इत्येव ब्रूयात् इत्युक्तम्। कैयटरीत्या गौणे प्रवृत्त्यभावाय बहुवचननिर्देशस्यावश्यकतया तदसङ्गतिः स्पष्टैव। एवञ्च हरदत्तादिरत्नकारान्तानामेतत्प्रयोगविचारः सर्वोऽपि निष्फल एवेति बोध्यम्।

अत एव ष्णान्ता षट् इति सूत्रे भाष्ये अष्टानाम् इत्येतत्सिद्धये हलीत्यपकर्षमुक्त्वा तत्र पक्षे प्रियाष्टौ-प्रियाष्टाः इति सिद्ध्यति, प्रियाष्टानी - प्रियाष्टानः इति प्राप्नोति इति शङ्कते 'यथलक्षणमप्रयुक्ते' इति समाहितम्। तत्र कैयटः १ लक्षणमनतिक्रम्य यथालक्षणमिति अव्ययीभावसमासः। अप्रयुक्ते विषये लक्षणानतिक्रमेण प्रवृत्तिरित्यर्थः। २ लक्षणस्याभावः अलक्षणम्, अलक्षणं योग्यम् यथालक्षणम् इति अव्ययीभावगर्भोऽव्ययीभावः। लक्षणपदस्य लक्षणप्रवृत्तिरित्यर्थः। अप्रयुक्ते लक्षणप्रवृत्त्यभावस्यैव योग्यता, न तु लक्षणप्रवृत्तेः। एवञ्च तादृशः प्रयोगः असाधुः। अत्र द्वितीयव्याख्यैवोचिता। प्रयुक्तेऽपि लक्षणानतिक्रमात्। प्रयुक्तानामिदमन्वाख्यानमिति भाष्योक्तेः, भाष्यकारस्य लक्ष्यैकचक्षुष्कत्वाच्च। अन्यथा प्रियाष्टानः इत्यादेराद्यव्याख्यायां साधुत्वं, द्वितीयाव्याख्यायां शास्त्रविषयत्वेनासाधुत्वं च प्रसज्येत। अत एव कैयटः - हल्ङ्यादिसूत्रे 'अप्रयुक्ते लक्षणाभावः इति व्याख्यातम्। नाम्रेडितस्यान्त्यस्य तु वा इति सूत्रे भाष्ये 'प्रयोगमूलत्वादस्य शास्त्रस्य प्रयोगाभावे न प्रवृत्तिः' इत्युक्तम्।

किञ्च प्रियाष्टादीनामभिधाने गौणे बहुवचनैकवचननिर्देशयोः फलभेदस्य सत्त्वेन तद्विषयशङ्कासमाधानयोरकरणं भाष्यकृतः न्यूनतामावहेदिति तदनभिधानमेव सर्वथा भाष्यतात्पर्यमिति भावः।